# संस्कृतभारती

## भाषाप्रवेशः (प्रथमः भागः)

## वार्षिकी परीक्षा

**अङ्काः - 50** **समयः - 75 निमेषाः**

1. **अधःप्रदत्तेषु शब्देषु यथायोग्यं "सः तौ ते/ सा ते ताः/ तत् ते तानि" इत्येतेषां प्रयोगं कुर्वन्तु-**

   **उपाधयः, प्रकृती, स्नुषा, दधि, उपन्यासः,**
   **ध्वनयः, वस्त्रे, मधूनि , प्रकौष्ठौ**

2. **रिक्तस्थानानि उचितविभक्त्यन्तेन शब्देन पूरयन्तु -**

   **क. ........... (पितृ + द्विवचनम्) वचनानि हिताय .......(भू+लट् )।**

3. **अधः प्रदत्तानां धातूनां क्तवतु-प्रत्ययान्तानि प्रथमाविभक्ति-रूपाणि (पुंल्लिङ्ग-स्त्रीलिङ्गयोः ) लिखन्तु-**

   **पिबति, इच्छति, गृह्णाति, तिष्ठति, पचति ।**

4. **पितृ, वस्तु, द्रोणी, बुद्धिः च इत्येतेषां शब्दानां चतुर्थी-पञ्चमी-षष्ठी-सप्तमीविभक्तीनां त्रिषु वचनेषु रूपाणि लिखन्तु ।**

5. **अधोलिखितधातूनां क्त्वान्त-ल्यबन्तरूपाणि लिखन्तु-**

**पृच्छति, सम्-प्रच्छ्  स्मरति, वि-स्मृ  ददाति, प्र-दा**

6. **निम्नलिखितवाक्येषु लङ्लकारस्य प्रयोगं कुर्वन्तु-**

**क. रामलक्ष्मणौ समुद्रतीरं गन्तुम् इच्छतः।**

**(एवमेव अन्यानि वाक्यानि सम्भवन्ति)**

7. **निम्नलिखितवाक्येषु लृट्-लकारस्य प्रयोगं कुर्वन्तु-**

**क. अहं तुभ्यं साहित्यपुस्तकं ......... (दा)।**

8. **"अहं संस्कृतानुरागी" इति विषये निम्नशब्दान् उपयुज्य दश वाक्यानि लेखनीयानि।**

**पुरतः, बहिः (इत्यादयः भवितुम् अर्हन्ति।)**

9. **अधोलिखितवाक्येषु क्रियापदानां विभज्य प्रयोगं कुर्वन्तु-**

**क. यः अन्तकाले प्रभुं स्मरिष्यति सः मोक्ष्यति।**

**(एवमेव अन्यानि वाक्यानि सम्भवन्ति)**